# ॥ भूसूक्तम् ॥

भूमिर्भूम्नाद्यौर्वरिणान्तरिक्षं महित्वा । उपस्थे ते देव्यदितेग्निमन्नाद-मन्नाद्यायादधे ॥ आऽयङ्गौः पृश्निरक्रमी दसनन् मातरं पुनः । पितरं च प्रयन्त्सुवः ॥ त्रिग्ं शद्धाम विराजति वाक्पतङ्गाय शिश्रिये । प्रत्यस्य वह द्युभिः । अस्य प्राणादपानत्यन्तश्चरति रोचना । व्यख्यन् महिषः सुवः॥ यत्त्वा क्रुद्धः परोवपमन्युना यदवर्त्या । सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि ॥ यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे । आदित्या विश्वे तद्देवा वसवश्च समाभरन् ॥ मेदिनी देवी वसुन्धरा स्याद्वसुधा देवी वासवी । ब्रह्मवर्चसः पितृणां श्रोत्रं चक्षुर्मनः ॥ देवी हिरण्यगर्भिणी देवी प्रसोदरी । सदने सत्यायने सीद ॥ समुद्रवती सावित्रीह नो देवी मह्यकी (मह्यङ्गी) । महोधरणी महोव्यथिष्ठा श्शृङ्गे शृङ्गे यज्ञे यज्ञे विभीषणी ॥ इन्द्रपत्नी व्यापिनी सुरसरिदिह । वायुमती जलशयनी श्रियंधाराजा सत्यन्धो परिमेदिनी ॥ श्वोपरिधत्तङ्गाय । विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम् । लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युत वल्लभाम् ॥

(ॐ) धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि । तन्नो धरा प्रचोदयात् ॥

शृण्वन्ति श्रोणा-ममृतस्य गोपाम् । पुण्यामस्या उपशृणोमि वाचम् ॥
महीं देवीं विष्णुपत्नी-मजूर्याम् । प्रतीची मेनाग्ं हविषा यजामः ॥
त्रेधा विष्णुरुरुगायो विचक्रमे । महीं दिवं पृथिवीमन्तरीक्षम् । तच्छ्रोणैति श्रव इच्छमाना । पुण्यग्ं श्लोकं यजमानाय कृण्वती ॥

मनो ज्योतिर्जुषताम् आज्यं विच्छिन्नं यज्ञग्ं समिमं दधातु । बृहस्पतिस्तनुतामिमं नो विश्वे देवा इह मादयन्ताम् ॥

सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि । सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्वा घृतेन ॥

पुनरूर्जा निवर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाहि विश्वतः ॥

सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्निया विश्वतस्परि ॥

लेकः सलेकः सुलेकस्तेन आदित्या आज्यं जुषाणा वियन्तु केतः सकेतः सुकेतस्तेन आदित्या आज्यं जुषाणा वियन्तु विवस्वाग्ं अदितिर्देवजूतिस्तेन आदित्या आज्यं जुषाणा वियन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

# || bhū sūktam ||

bhūmirbhūmnādyaurvariṇāntarikṣaṁ mahitvā | upasthē tē dēvyaditēgnimannāda-mannādyāyādadhē || āऽyaṅgauḥ pr̥śnirakramī dasanan mātaraṁ punaḥ | pitaraṁ ca prayantsuvaḥ || trigṁ śaddhāma virājati vākpataṅgāya śiśriyē | pratyasya vaha dyubhiḥ | asya prāṇādapānatyantaścarati rōcanā | vyakhyan mahiṣaḥ suvaḥ|| yattvā kruddhaḥ parōvapamanyunā yadavartyā | sukalpamagnē tattava punastvōddīpayāmasi || yattē manyuparōptasya pr̥thivīmanudadhvasē | ādityā viśvē taddēvā vasavaśca samābharan || mēdinī dēvī vasundharā syādvasudhā dēvī vāsavī | brahmavarcasaḥ pitr̥ṇāṁ śrōtraṁ cakṣurmanaḥ || dēvī hiraṇyagarbhiṇī dēvī prasōdarī | sadanē satyāyanē sīda || samudravatī sāvitrīha nō dēvī mahyakī (mahyaṅgī) | mahōdharaṇī mahōvyathiṣṭhā śśr̥ṅgē śr̥ṅgē yajñē yajñē vibhīṣaṇī ||

indrapat-nī vyāpinī surasaridiha | vāyumatī jalaśayanī śriyaṁdhārājā satyandhō parimēdinī || śvōparidhattaṅgāya | viṣṇupat-nīṁ mahīṁ dēvīṁ mādhavīṁ mādhavapriyām | lakṣmī priyasakhīṁ dēvīṁ namāmyacyuta vallabhām ||
(ōm̐) dhanu-rdharāyai vidmahē sa-rvasiddhyai ca dhīmahi | tannō dharā pracōdayāt ||
śr̥ṇvanti śrōṇām amr̥tasya gōpām | puṇyāmasyā upaśr̥ṇōmi vācam || mahīṁ dēvīṁ viṣṇupatnī-majūryām | pratīcī mēnāgaṁ haviṣā yajāmaḥ || trēdhā viṣṇururugāyō vicakramē | mahīṁ divaṁ pr̥thivīmantarīkṣam | tacchrōṇaiti śrava icchamānā | puṇyagg ślōkaṁ yajamānāya kr̥ṇvatī ||
manō jyōtirjuṣatām ājyaṁ vicchinnaṁ yajñagṁ samimaṁ dadhātu | br̥haspatistanutāmimaṁ nō viśvē dēvā iha mādayantām ||
sapta tē agnē samidhaḥ sapta jihvāḥ sapta r̥ṣayaḥ sapta dhāma priyāṇi | sapta hōtrāḥ saptadhā tvā yajanti sapta yōnīrā pr̥ṇasvā ghr̥tēna ||
punarurjā nivartasva punaragna iṣā:':'yuṣā | punarnaḥ pāhi viśvataḥ ||
saha rayyā nivartasvāgnē pinvasva dhārayā | viśvapsniyā viśvataspari ||
lēkaḥ salēkaḥ sulēkastēna ādityā ājyaṁ juṣāṇā viyantu kētaḥ sakētaḥ sukētastēna ādityā ājyaṁ juṣāṇā viyantu vivasvāgṁ aditirdēvajūtistēna ādityā ājyaṁ juṣāṇā viyantu ||
ōm̐ śāntiḥ śāntiḥ śāntiḥ ||

## ॥ नीळासूक्तम् ॥

गृणाहि । घृतवती सवितराधिपत्यैः पयस्वतीरन्तिराशानो अस्तु । ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसो या मनोता । बृहस्पतिर्मातरिश्वोत वायुस्सन्धुवानावाता अभि नो गृणन्तु । विष्टम्भो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी ॥

(ॐ) विष्णुपत्न्यैच विद्महे भूसख्यै च धीमहि । तन्नो नीळा प्रचोदयात् ॥

(ॐ) महादेव्यै च विद्महे विष्णुपत्न्यैच धीमहि । तन्नो नीळा प्रचोदयात् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

## || nīḷā sūktam ||

gṛṇāhi | ghṛtavatī savitarādhipatyaiḥ payasvatīrantirāśāno astu | dhruvā diśāṃ viṣṇupatnyaghorā'syeśānā saheso yā manotā | bṛhaspatirmātariśvota vāyussandhuvānāvātā abhi no gṛṇantu | viṣṭambho divo dharuṇaḥ pṛthivyā asyeśānā jagato viṣṇupatnī ||

(oṁ) viṣṇupatnyaica vidmahe bhūsakhyai ca dhīmahi | tanno nīḷā pracodayāt ||

(oṁ) mahādevyai ca vidmahe viṣṇupatnyaica dhīmahi | tanno nīḷā pracodayāt ||

oṁ śāntiḥ śāntiḥ śāntiḥ ||